শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীনারাযণযতীন্দ্রমহাদেশিকৈরনুগৃহীতং

# ॥ শ্রী কৃষ্ণ মঙ্গলাশাসনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী কৃষ্ণ মঙ্গলাশাসনম্ ॥

গীতোপনিষদাচার্যে মম যামুনদেশিকে।
যতীন্দ্রে চাগমান্তার্যে ভক্তির্ভদ্রায ৱর্ধতাম্॥ **1** ॥

সচ্ছিষ্যাদ্যুপদেশ্যায দেহাত্মভ্রমঘাতিনে।
আদিষ্টকর্মযোগায গীতাচার্যায মঙ্গলম্॥ **2** ॥

উক্ত সর্ৱাত্মসাম্যায জীৱ যোগ ৱিধাযিনে।
সাক্ষিণে জ্ঞানিনি শ্রেষ্ঠক্রিযাৱেদ্যায মঙ্গলম্॥ **3** ॥

সাঙ্গভক্তি সমাদেষ্ট্রে নিস্সীমগুণ ভূতযে।
সুচক্ষুর্দানদক্ষায ক্রমোপাস্যায মঙ্গলম্॥ **4** ॥

গীতক্ষেত্রজ্ঞতত্ত্বায ত্রিগুণদ্রৱ্যৱাদিনে।
চেতনাচেতনেশায শাস্ত্রৱেদ্যায মঙ্গলম্॥ **5** ॥

ত্রেধাৱিভক্ত ধর্মায সারোপাযপ্রদর্শিনে।
ভক্তিপ্রপত্তিলভ্যায গীতাচার্যায মঙ্গলম্॥ **6** ॥

নারাযণেন মুনিনা কৃতং গীতার্য মঙ্গলম্।
আশাস্তেঽনুদিনং সোঽপি ভৱেন্মঙ্গলভাজনম্॥ **7** ॥

॥ ইতি শ্রী কৃষ্ণ মঙ্গলাশাসনং সমাপ্তম্ ॥